हेत्वाभासस्वरूपविमर्शः

- डॉ. गणपतिशुक्लः

शोधसारांशः -

हेत्वाभासस्वरूपविषये चिन्तामणिकारैः श्रीमद्गङ्गेशोपाध्यायैः उक्तं यत् अथ हेत्वाभासस्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते। ईश्वरसाधकत्वं परमप्रयोजनमुक्तिकारणत्वञ्च परम्परया हेत्वाभासानां वर्तते। अत एव आचार्यैः श्रीमद्गङ्गेशोपाध्यायैः निःश्रेयसरूपफलप्रतिपादकं मोक्षाङ्गतत्त्वदर्शनभूतं हेत्वाभासानां लक्षणविभागपुरस्सरं निरूपणं कृतम् । हेत्वाभासानां ज्ञानं विना विजयः अपि नैव भवितुमर्हति । हेत्वाभासज्ञाने प्रवृत्तिः तदा भवति यदा तस्येष्टसाधनत्वं स्यात् । यतो हि प्रवृत्तिं प्रति इष्टसाधनताज्ञानं कारणं भवति। इदं ज्ञानं मदिष्टसाधनं इति ज्ञाते सत्येव प्रवृत्तिर्भवति। अस्मिन् शोधपत्रे हेत्वाभासानां पञ्चविधत्वं तत्ततदाचार्यैः प्रदर्शितम् । तेन गवेषकाणां हेत्वाभासस्वरूपविषये पूर्णतया ज्ञानं भवेत् ।

"अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते"[1] इत्युक्तं चिन्तामणिकारैः श्रीमद्गङ्गेशोपाध्यायैः। अस्यार्थः तत्त्वनिर्णयविजयप्रयोजकत्वादित्यत्र पञ्चम्यर्थः तज्ज्ञानजन्यजिज्ञासाधीनत्वं भवति । निरूप्यन्त इत्यत्र नीपूर्वकरूपधातुः वर्तते । तस्यार्थः प्रतिपत्यनुकूलोव्यापारः । तादृशव्यापारे पञ्चम्यर्थस्य तज्ज्ञानजन्यजिज्ञासाधीनत्वस्यान्वयः । प्रतिपत्ति आख्यातार्थः । यतो हि भट्टाचार्यैः द्वितीयाव्युत्पत्तिवादग्रन्थे व्यापारो धात्वर्थः फलमिति कर्मप्रत्ययार्थ इति कर्माख्यातार्थस्थले प्राचीनमते भवतीत्युक्तम् ।[2] प्रतिपत्तेः वर्तमानकालोत्तरकालवृत्तित्वमर्थः । मणिकारसमवेतकृतौ तस्यान्वयः । जन्यतासम्बन्धेन कृतेः व्यापारभूते धात्वर्थेऽन्वयः, प्रतिपत्तौ जन्यतासम्बन्धेन व्यापारस्यान्वयः, विषयतासम्बन्धेन हेत्वाभासे तस्याः अन्वयः । एवञ्च हेत्वाभासाः सद्धेतुनिरूपणानन्तरतत्त्वनिर्णयविजय-प्रयोजकत्वज्ञानजन्यजिज्ञासाधीनचिन्तामणिकारसमवेतवर्तमानकालोत्तरकालवृत्तिकृतिजन्यव्यापारजन्यप्रति पत्तिविषयतावन्त इति ।

हेतोः केनापि रूपेण रहिताः कैश्चिदन्विताः हेत्वाभासाः भवन्ति । परमप्रयोजनमनुमानस्यापवर्गः । ईश्वरानुमाने मुक्तिकारणत्वमीश्वरसाधकत्वमनुमानस्येति समर्थितम् । परम्परया हेत्वाभासानामपि ईश्वरसाधकत्वं परमप्रयोजनमुक्तिकारणत्वञ्च वर्तते । यतो हि अनुमाननिरूपणं हेत्वाभासनिरूपणं विना नैव भवितुमर्हति । अत एव श्रीमद्गङ्गेशोपाध्यायैः निःश्रेयरूपफलप्रतिपादकं मोक्षाङ्गतत्त्वदर्शनभूतं हेत्वाभासानां लक्षणविभागपुरःसरं निरूपणं कृतमथेत्यादिना । अत्र हेत्वाभासनिरूपणं प्रसङ्गत्या कृतम् । यतो हि व्याप्तिपक्षधर्मताविशिष्टसद्धेतुनिरूपणे जाते सति असद्धेतोः स्मरणं भवति । कथमिति चेत् नियमोऽयं "एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं भवति । अत्र सद्धेतुः एकः सम्बन्धी अपरः सम्बन्धी

असद्धेतुः । एवञ्च सद्धेतोः ज्ञाने जाते व्याप्तिपक्षधर्मताविरहविशिष्टदुष्टहेतोः स्मरणं भवति । अवच्छेदकावच्छेदेन निरूपणं प्रत्यवच्छेदकावच्छेदेन सङ्गतेः कारणत्वम् । नियमोऽयं यो यन्निरूपणानन्तरनिरूपणीयः सः तन्निरूपितसङ्गतिमान् भवति । तत्त्वनिर्णयः यथार्थनिश्चयः विजयो नाम पराहङ्कारखण्डनमिति । तत्त्वनिर्णयविजयप्रयोजकत्वादित्यत्र प्रयोजकत्वञ्च जनकजनकतावच्छेदकसाधारणम् ।[3] स्वविषयकज्ञानकार्यं प्रति स्वस्य प्रयोजकत्वम् । अत्र स्वपदेन हेत्वाभासस्य ग्रहणं तद्विषयकज्ञानं हेत्वाभासज्ञानं, तत्कार्यं तत्त्वनिर्णयविजयरूपं तादृशकार्यं प्रति हेत्वाभासस्य प्रयोजकत्वं वर्तते । प्रवृत्तिं प्रति इष्टसाधनताज्ञानं कारणं भवति। तथापि सङ्गत्यप्रदर्शने असङ्गतत्वज्ञानेनोन्मत्तप्रलपितत्वमायाति । अतः दीधितिकारेण रघुनाथशिरोमणिना सङ्गतिप्रदर्शनमावश्यकमेवेत्युक्तम् । हेत्वाभासनिरूपणे एककार्यानुकूलरूपसङ्गतेरपि प्रदर्शितम् । एकाकार्यानुकूलत्वञ्च एककार्यप्रयोजकत्वम् । अर्थात् स्वभिन्नत्वे सति स्वप्रयोज्यकार्यप्रयोजकत्वम् । यथा हेत्वाभासः । एककार्यप्रयोजकत्वलक्षणे स्वपदेन व्याप्तिपक्षधर्मताविशिष्टहेतुः तद्भिन्नत्वं हेत्वाभासे वर्तते, पुनः स्वपदेन तस्यैव ग्रहणं तत्प्रयोज्यं यत्कार्यं तत्त्वनिर्णयविजयरूपकार्यं तत्प्रयोजकत्वमपि हेत्वाभासे वर्ततेति सङ्गतिलक्षणस्य लक्षणसमन्वयः । अत्र प्रश्न उदेति यत् हेत्वाभासज्ञानकार्यं प्रति हेत्वाभासस्य कारणत्वाभावात् कुतो लक्षणसमन्वयः ? तत्र उच्यते प्रयोजकत्वं च जनकजनकतावच्छेदक-साधारणकारणतावच्छेदकावृत्त्यत्यन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वम् । तथा च हेत्वाभासे जनकत्वरूपप्रयोजकत्वाभावेऽपि जनकतावच्छेदकत्वप्रयोजकत्वस्य सत्त्वाल्लक्षण-समन्वयः । यतो हि हेत्वाभासज्ञाननिष्ठा या तत्त्वनिर्णयविजयरूपजनकता विषयतया तदवच्छेदकत्वं हेत्वाभासे वर्तते ।

अपि च तत्त्वनिर्णयः प्रमितिकोटिनिश्चयः ।[4] अर्थात् प्रमाविषयीभूता या कोटिः सा मिति कोटिः तादृशकोटिकनिर्णयः । उभयोः तत्त्वनिर्णयप्रयोजकत्वं वर्तते । यथा व्याप्तिपक्षधर्मताविशिष्ट-सद्धेतुज्ञानमिव साध्याभावसाधकहेतौ असद्धेतौ हेत्वाभासत्वज्ञानमप्युपयुज्यते । अतः सदसद्धेतोः तत्त्वनिर्णयप्रयोजकत्वं सिद्धम् । तथा च पर्वतो वह्निमान् धूमात् पर्वतो वह्न्यभाववान् जलादित्यत्र वादिप्रतिवादियुद्धे यथा सद्धेतुज्ञानस्य प्रमात्वानुमितावुपयोगः तथैवासद्धेतुज्ञानस्याप्रामाण्यग्राहकत्वम् । एवञ्च वह्न्यभावव्याप्यजलवान् पर्वत इति परामर्शः अनन्तरं सिद्धिज्ञानेन (पर्वतनिरूपितवृत्तित्वाभाववज्जलम्) ततः पर्वतनिरूपितवृत्तित्वाभावस्य जले ज्ञाने जाते जलाभाववति पर्वते जलं परामृशामीत्यनुव्यवसायेन जलाभाववद्विशेष्यकत्वे सति जलप्रकारकत्वरूपमप्रामाण्यं विषयीक्रियते । तथा च प्रतिबन्धकीभूतविपरीतकोटिव्याप्यवत्ताज्ञाने अप्रामाण्यग्राहकत्वात् । एवञ्च प्रतिबन्धकाभावरूपकारणेन दोषस्योपयोगित्वम् । अतः उभयोःसदसद्धेतोः तत्त्वनिर्णयप्रयोजकत्वम् ।

इयमनुमितिः प्रमा स्वविषयसाध्यनिरूपितव्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानजन्यत्वात् । इयमनुमितिः अप्रमा स्वविषयीभूतसाध्यव्याप्तिपक्षधर्मत्वाभावविशिष्टप्रकृतहेतुविषयकत्वे सति स्वीयसाध्यविषयतानिरूपितव्याप्तिविषयत्वादिनिरूपितप्रकृतहेतुविषयकत्वात् । प्रमितिकोटिनिश्चयपक्षे इदं ज्ञानमप्रमा स्वविरोध्यनुमितिजनकहेत्वदुष्टकालीन-त्वादितितर्करत्नकाराः सद्धेतुदुष्टहेतूभयोः

तत्त्वनिर्णयप्रयोजकत्वं वदन्ति । हेत्वाभासस्य विजयप्रयोजकत्वमपि वर्तते ।[5] कथमिति चेत् पराहङ्कारखण्डनप्रयोजकत्वं स्वज्ञानाधीनपरोक्त- हेतुदोषोद्भावनद्वारा भवति । अत्र स्वपदेन हेत्वाभासस्य ग्रहणं, तज्ज्ञानाधीनं हेत्वाभासज्ञानजन्यं परोक्तहेतुः प्रतिवादिहेतुः हेत्वाभासस्य भवति । अत्रानुमानप्रकारः भवति । मम हेतुः समीचीनः व्याप्तिपक्षधर्मताविशिष्टत्वात् । तव हेतुः दुष्टः सव्यभिचरितत्वात्, विरूद्धत्वात्, सत्प्रतिपक्षितत्वात्, असिद्धत्वात् बाधितत्वादित्यादिरीत्या परकीयहेतौ दोषोद्भावनद्वारा हेत्वाभासज्ञाननिष्ठजनकतावच्छेदकविधया विजयप्रयोजकत्वं हेत्वाभासे वर्तते । तथैव सद्धेतावपि व्याप्तिपक्षधर्मताविशिष्टहेतुज्ञानाधीनपञ्चावयवरूपन्यायप्रयोगद्वारा सद्धेतुज्ञाननिष्ठविजयकारणता-वच्छेदकतया विजयप्रयोजकत्वं वर्तते । अतः तत्त्वनिर्णयविजयप्रयोजकत्वं हेत्वाभासे वरीवर्ति ।

तत्र तावत् प्रथमलक्षणं हेत्वाभासस्य वर्तते यत् अनुमितिकारणीभूताभावप्रतियोगिययार्थ-ज्ञानविषयत्वमिति। अत्रानुमितेः आकारः पक्षः साध्यवान् साध्यव्याप्यहेतुमांश्चेति समूहालम्बनानुमितेः ग्रहणम् । अथवा अनुमितितत्कारणपरामर्शान्यतररूपानुमितैः समावेशः । तथा च लक्षणप्रकारः अनुमितिनिष्ठकार्यतानिरूपितकारणताश्रयीभूतो योऽभावः तत्प्रतियोगी यत् यथार्थज्ञानं तद्विषयत्वं हेत्वाभाससामान्यलक्षणम् । लक्षणसमन्वयप्रकारस्तु ह्रदो वह्निमान् जलादित्यत्र वह्न्यभाववद्धृत्तिजलरूपव्यभिचारे, वह्न्यसमानाधिकरणजलरूपविरोधे, वह्न्यभाव-वाप्यवद् ह्रदरूपसत्प्रतिपक्षे, वह्न्यभाववद्ह्रदरूपबाधे लक्षणसमन्वयः । यतो हि ह्रदविशेष्यकवह्निप्रकारकानुमितिजनकीभूतवह्निव्याप्यजलवान् ह्रद इति परामर्शं प्रति वह्न्यभाववद् वृत्तिजलरूपव्यभिचारनिश्चयस्य वह्न्यसमानाधिकरणजलरूपविरोधनिश्चयस्य च प्रतिबन्धकत्वात् । तदभावस्य प्रतिबन्धकाभावरूपेण तादृशपरामर्शं प्रति कारणत्वेन तादृशानुमितेः कारणीभूतो यः अभावः व्यभिचारनिश्चयाभावः विरोधनिश्चयाभावश्च तत्प्रतियोगी यत् यथार्थज्ञानं व्यभिचारनिश्चयात्मकं विरोधनिश्चयात्मकश्च यथार्थज्ञानं तद्विषयत्वस्य तादृशव्यभिचारे उक्तविरोधे च सत्त्वेन लक्षणसमन्वयः । अथ च बाधे सत्प्रतिपक्षे च ह्रदो वह्निमानित्यनुमितिं प्रति वह्न्यभाववान् ह्रद इति बाधनिश्चयस्य वह्न्यभावव्याप्यवान् ह्रद इति सत्प्रतिपक्षनिश्चयस्य च प्रतिबन्धकत्वात्, तदभावास्य च प्रतिबन्धकाभावस्य कारणत्वमिति मतमवलम्ब्यतादृशानुमितिं प्रति कारणत्वात् । तथा च ह्रदो वह्निमानित्यनुमितिकारणीभूतो यः अभावः वह्न्यभाववान् ह्रद इति बाधनिश्चयाभावः वह्न्यभावव्याप्यवान् ह्रद इति सत्प्रतिपक्षनिश्चयाभावश्च तत्प्रतियोगी यद् यथार्थज्ञानं बाधनिश्चयात्मकं वह्न्यभाववान् ह्रद इत्याकारकं वह्न्यभावव्याप्यवान् ह्रद इत्याकारकसत्प्रतिपक्षनिश्चयात्मकं ज्ञानं तद्विषयत्वस्य वह्न्यभाववद् ह्रदे वह्न्यभावव्याप्यवद् ह्रदे च सत्त्वात् बाधे सत्प्रतिपक्षे लक्षणसमन्वयः । अनयैव रीत्या असिद्ध्यादिषु लक्षणसमन्वयो भवति । सद्धेतुस्थले नातिव्याप्तिः । यतोहि पर्वतो वह्निमान् धूमादित्यत्र हेत्वाभासलक्षणस्यालक्ष्ये वह्न्यभाववान् पर्वत इति यथार्थज्ञानस्याप्रसिद्धत्वान्नातिव्याप्तिः ।

अत्र प्रश्न उदेति यत् अमुमितिप्रयोजकीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमिति कथं नोक्तम् ? यतो हि अन्यथासिद्धिशून्यत्वादिघटितकारणस्य प्रवेशे गौरवं स्यात् । तत्र उच्यते परामर्शे प्रयोजकीभूताभावघटितलक्षणे अतिव्याप्तिः स्यात् । कथमिति चेदनुमितिं प्रति

अप्रामाण्यज्ञानाभावविशिष्टपरामर्शस्य कारणत्वेनाप्रामाण्यज्ञानाभावस्यापि प्रयोजकत्वात् । अतः अनुमितिप्रयोजकीभूताभावः तादृशाप्रामाण्यज्ञानाभावः तत्प्रतियोग्यप्रामाण्यज्ञानविषयकत्वस्य तादृशपरामर्शे सत्त्वादतिव्याप्तिः । अतः कारणत्वनिवेशः । तन्निवेशे परामर्शे नातिव्याप्तिः । यतोहि अनुमितिकारणीभूताभावपदेन परामर्शाभावस्याथचाप्रामाण्यज्ञानाभावस्य चाग्रहणान्नाति-व्याप्तिः ।

केचित् वदन्ति अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभाससामान्य-लक्षणम् ।[6] यतो हि प्रतिबन्धकत्वं द्विविधं कारणीभूताभावप्रतियोगित्वं प्रयोजकीभूताभाव-प्रतियोगित्वञ्च । एवञ्चानुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमिति लक्षणे कारणी-भूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वसूचनाय कारणीभूतेत्यादिलक्षणं कृतम्।

ननु भूतपदं किमर्थमिति ? तत्र उच्यते सद्धेतावतिव्याप्तिः परामर्शे चातिव्याप्तिः । यतो हि भूतपदानुपादाने अनुमितिकारणाभावप्रतियोगियथ ज्ञानविषयत्वमिति लक्षणं भवति । अस्मिन् लक्षणे कारणस्याभावः कारणाभाव इति षष्ठीसमासः कर्तुं शक्यते । मेतानुमितिकारणपरामर्शस्याभावप्रतियोगियथार्थज्ञानविषयत्वस्य सद्धेतौ परामर्शे च सत्त्वात् सद्धेतौ परामर्शे चातिव्याप्तिः । यतो हि भूतपदानुपादाने अनुमितिकारणाभावप्रतियोगियथार्थज्ञानविषयत्वमिति लक्षणे कारणस्याभावः कारणाभाव इति षष्ठीसमासः कर्तुं शक्यते । तेनानुमितिकारणपरामर्शस्याभावप्रतियोगियथार्थज्ञानविषयत्वस्य सद्धेतौ परामर्शे च सत्त्वात् सद्धेतौ परामर्शे चातिव्याप्तिः । अतः भूतपदम् । भूतपदाने परामर्शाभावस्यानुमितिकारणीभूताभावपदेन धर्तुमशक्यत्वान्नातिव्याप्तिः । अनुमितिकारणीभूतो यः तत्प्रयोगियथार्थज्ञानविषयत्वमित्येव हेत्वाभाससामान्यलक्षणमुच्यतां किमर्थमभावपदोपादानम्।[7] तत्र उच्यते अयमात्मा आत्मत्वप्रकारकज्ञानप्रतियोगिकसमवायादित्यत्रात्मत्वे अतिव्याप्तेः। यतो हि ज्ञायमानं लिङ्गमनुमितिकरणमिति प्राचीनमतानुसारेण ज्ञायमानलिङ्गस्य कारणत्वेनात्मत्वप्रकारकज्ञान-प्रतियोगिसमवायरूपहेतोः कारणत्वात् हेत्वन्तर्गततत्प्रतियोगियथार्थज्ञानविषयत्वस्यात्मत्वे सत्त्वादतिव्याप्तिः। तदुपरि उच्यते यत्किञ्चितसम्बन्धावच्छिन्नत्व-मनुमितिकारणीभूतो यस्तन्निरूपितप्रतियोगितायां निवेश्यते । तेन सांसर्गिकप्रतियोगितायां संसर्गावच्छिन्नत्वाभावान्नातिव्याप्तिः । तथा च लक्षणप्रकारः अनुमितिकारणता-वच्छेदकीभूतानुयोगितानिरूपितप्रतियोगित्वाश्रययथार्थज्ञानविषयत्वमिति हेत्वाभाससामान्यलक्षणम् । पुनः प्रश्न उदेति यत् हेत्वाभाससामान्यलक्षणे ज्ञानपदं किमर्थम्? तथा च लक्षणं भवति यत् अनुमितिकारणीभूतो यो अभावस्तप्रतियोगी यो यथार्थस्तद्विषयत्वम् । एवं लक्षणे कृते चेत् कामिनीज्ञानेऽतिव्याप्तिः स्यात् । यतो हि कामिनीज्ञानान्यज्ञानात्वावच्छिन्नं प्रति कामिनीजिज्ञासायाः प्रतिबन्धकत्वात् । तेन कार्यमात्रं प्रति तदभावस्य कारणत्वात् । एवञ्च पर्वतो वह्निमान् धूमादित्यादिसद्धेतौ पर्वतो वह्निमानित्याकारकानुमितिकारणीभूताभावः कामिनीजिज्ञासाभावः तत्प्रतियोगिकामिनी जिज्ञासाविषयत्वमादाय कामिनीज्ञाने अतिव्याप्तिः । अतः ज्ञानपदम् । तेन नातिव्याप्तिः ।

हेतुवदाभासन्त इति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतुपरत्वम् । हेतोराभासाः हेत्वाभासा इति व्युत्पत्त्या दोषपरत्वम् । दोषवत्त्वं च दुष्टत्वम् । मूलोक्तलक्षणं यदि दुष्टहेतोः क्रियते तदा दोषेष्वतिव्याप्तिर्भवति । दुष्टेहेतावव्याप्तिश्च । अतः न मूलोकालक्षणं दुष्टहेतोः । अपि तु दोषाणामेव । दोषलक्षणं विना दुष्टलक्षणं नैव भवितुमर्हति । अत एव दीधितिकारेण यथाश्रुततमिदं हेतुदोषाणां लक्षणमित्युक्तम् ।[8]

अनुमितिकारणत्यादिहेत्वाभाससामान्यलक्षणे अनुमितिपदस्यानुमितिसामान्यपरत्वं यत्किञ्चिदनुमितिपरत्वं वा ? नाद्य अनुमितित्वव्यापकत्वार्थकत्वे लक्ष्यमात्रावर्तनप्रसङ्गात् । यतो हि यावदनुमितौ कस्यापि निश्चयस्य प्रतिबन्धकत्वं नास्ति । कथमिति चेत् अनुमितित्वव्यापकप्रतिबध्यतायाः अप्रसिद्धत्वात् । न द्वितीयः अनुमिति-त्वाश्रयपरत्वे अतिव्याप्तिः स्यात् । यथा पर्वतो वह्निमान् धूमादित्यत्र वह्न्यभावविशिष्टह्रदस्य दोषत्वापत्तिः स्यात् । यतो हि यत्किञ्चिदनुमितिपदेन ह्रदो वह्निमानित्याकारानुमितिः तादृशानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकता वह्न्यभाववान् ह्रद इत्याकारकनिश्चयनिष्ठप्रतिबन्धकतातच्छादियथार्थज्ञानविषयत्वस्य वह्न्यभाववद् ह्रदे सत्त्वादतिव्याप्तिः । अनुमितिसामान्यपरत्वे तु लक्षणमिदं भवति अनुमितित्वव्यापककार्यता-निरूपितकारणत्वाश्रयीभूतो योऽभावः तत्प्रतियोगियथार्थज्ञानविषयत्वम् । यद्किञ्चिदनुमितिपरत्वे तु यत्किञ्चिदनुमिति-निष्ठप्रतिबध्यतानिरूपितप्रतिबन्ध- कताशालियथार्थज्ञानविषयत्वमिति लक्षणाकारो भवति । असम्भवातिव्याप्तिदूषकत्वादनुमितिपदं नानुमितिसामान्यपरं न यत्किञ्चिदनुमितिपरं किन्तु प्रकृतपक्षतावच्छेदकावच्छिन्नवि शेष्यकप्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकप्रकृतहेतुतावच्छेद कावच्छिन्नहेतुकानुमितिपरम् । तेन नासम्भवः न वातिप्रसङ्गः । ह्रदो वह्निमान् जलादित्यादौ वह्न्यभाववद् ह्रदरूपबाधे लक्षणसमन्वयः । यतो हि ह्रदत्वावच्छिन्नविशेष्यकवह्नित्वावच्छिन्नप्रकारकह्रदत्वाव- च्छिन्नहेतुक-ह्रदो वह्निमान् जलश्चेत्यनुमितौ वह्न्यभाववान् ह्रद इत्याकारकनिश्चयस्य प्रतिबन्धकत्वात् । तादृशप्रतिबन्धकताशालियथार्थज्ञानविषयत्वस्य वह्न्यभाववद्ह्रदरूपबाधे सत्त्वाल्लक्षणसमन्वयः। एवं पर्वतो वह्निमान् धूमादित्यत्र वह्न्यभाववद् ह्रदे नातिव्याप्तिः । पर्वतत्वावच्छिन्नविशेष्यकवह्नित्वावच्छिन्नप्रकारकधूमत्वावच्छिन्नहेतुकानुमितिनिष्ठप्रतिबध्यता-निरूपितप्रतिबन्धकतायाः वह्न्यभाववान् ह्रद इत्याकारकनिश्चये अभावान्नातिव्याप्तिः ।

सूत्रकारेण व्युत्पत्तिनिमित्तमेव लक्षणं कृतम् । भाष्यकारेण हेतुलक्षणा-भावादभावादहेतवोहेतुसामान्याद्धेतुवदाभासमानाः हेत्वाभासा इत्युक्तम् ।[9] समाख्यानिरूक्तिवशात् हेत्वाभासानां सामान्यलक्षणं प्रतिपादितं ग्रन्थकारेण । हेतुलक्षणं हेतुत्वमिति । हेतुलक्षणाभावादित्यत्राभावपदेनात्यन्ताभावस्य ग्रहणम् । अहेतव अहेतुपदवाच्याः हेतुसाम्यात् हेतुवद् प्रतीयमानाः हेत्वाभासाः भवन्ति । हेतुसाम्यादित्यस्य पक्षसत्त्वादयो ये लिङ्गधर्मास्तदनुविधानमित्यर्थो भवति ।

हेत्वाभासाः पञ्चविधाः भवन्ति । सव्याभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः[10] इत्युक्तं सूत्रकारेण गौतमेन । अस्य सूत्रस्यार्थो विभागोद्देशनियमार्थम् । अनैकान्तिकः सव्यभिचारः ।[11] अत्र सूत्रे अनैकान्तिकसव्यभिचारशब्दौ पर्यायौ भवतः । एकस्य साध्यस्य साध्याभावस्य वा अन्ते अधिकरणमात्रे यस्तिष्ठति स एकान्तः तदन्यः अनैकान्तः भवतीति विवरणाचार्यै उक्तम् । इदमपि भवितुमर्हति यत् सव्यभिचारः इति हेत्वाभाससंज्ञा तस्य सव्यभिचारेण लक्ष्यनिर्देशो भवति लक्षणं भवति अनैकान्तिकः । ये अनैकान्तिक इत्येव हेत्वाभाससंज्ञा स्वीकुर्वन्ति तेषां मते अनैकान्तिकपदेन लक्ष्यनिर्देशः सव्यभिचार इति लक्षणम्। भाष्यकारः वदति यत् एकत्र व्यवस्था व्यभिचारः । सह व्यभिचारेण वर्तते इति सव्यभिचारः । अन्यदपि अविरूद्धधर्मद्वयव्यवस्थिताधिकरणं तत्रैव भवः ऐकान्तिकः तद्भिन्नो अनैकान्तिकः । भाष्ये उक्तं नित्यत्वमप्येकोन्तः अनित्यत्वमप्येकोन्तः, एकस्मिन्नन्ते विद्यत इति ऐकान्तिकः विपर्ययादनैकान्तिकः । यथा पर्वतो धूमवान् वह्नेरिति । सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः।[12] भाष्यमते कश्चिदभ्युपगतं सिद्धान्तं व्याहन्ति स विरुद्धः । यः अभ्युपेतं सिद्धान्तं व्याहन्ति स विरुद्ध इति । साध्याभावव्याप्तो हेतुर्विरुद्ध इति तर्कसंग्रहे उक्तम् । यः साधयति स विरुद्धः अर्थात् यत्साध्यसाधनायोपन्यस्तो हेतुस्तद्विरुद्धमेव भवतीति नवीनानां मतम् । अत एव विरुद्धस्य हेत्वाभासस्वरूपविषये प्राचीननवीनमतयोः भेदः दृश्यते । वार्त्तिके व्याख्यान्तरमपि कथितं वर्तते । प्रतिज्ञाहेत्वोर्वा विरोधो विरुद्धो हेत्वाभास इति ।

परिशुद्धौ विरुद्धस्यापसिद्धान्तात् भेदः प्रदर्शितः । स्वमते प्रमाणान्तरसिद्धस्यान्यथावचनमपसिद्धान्तः। वाक्यांशयोरेकार्थाभावाभावविषयत्वे विरोधः । विरूद्धस्योदाहरणम् यथा शब्दोऽनित्यः कृतकत्वादिति । यस्मात्प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः ।[13] प्रकरणसमपदस्य प्रवृत्तिनिमित्तन्तु सत्प्रतिपक्षत्वम्। अन्यथा अनैकान्तिकस्यापि प्रकरणसमत्वं स्यात् । कथमिति चेत् अनिश्चायकत्वसाम्यात् । प्रकरणं नाम प्रक्रियते साध्यत्वेनाधिक्रियते वादिप्रतिवादिभ्यामिति । तस्य प्रकरणस्यालोचनम् निर्णयायापदिश्यमाना प्रकरणसमो भवति । यथा शब्दः नित्यः अनित्यधर्मानुपलब्धेः, शब्दः अनित्यः नित्यधर्मानुपलब्धे ।

साध्याविशिष्टः साध्यत्वात्साध्यसमः ।[14] यथा द्रव्यं छाया गतिमत्वादिति । अत्र छायेति पक्षः द्रव्यं द्रव्यत्वं वा साध्यम् । तत्र उच्यते सामानाधिकरणसम्बन्धेन द्रव्यमेव साध्यम् । भाष्यकारेणोक्तं धर्मविशिष्टो धर्मी वा साध्यः । यथा शब्दोऽनित्यः कृतकत्वादिति । कालात्ययापदिष्टः कालातीतः ।[15] कालात्ययेन युक्तो यदर्थस्यैकदेशोऽपदिश्यमानस्य सः कालात्ययापदिष्टः कालातीतो भवति । अस्यापि हेत्वाभास्य स्वरूपविषये प्राचीननवीनमतयोः भेदः वर्तते । प्राचीनमते कालात्ययेन युक्तो यस्य हेतोरनुरूप एकदेशो हेतुविशेषणं स कालात्ययापदिष्टो भवति । यथा शब्दः नित्यः संयोगव्यङ्ग्यत्वात् । अत्र यस्मिन् काले शब्द उपलभ्यते तस्मिन् समये संयोगो नास्ति । नवीनमते प्रत्यक्षानुमानागमविरोधः भवति । वह्निरनुष्णः द्रव्यत्वात्, शब्दः

अश्रावणः गुणत्वात्, नरशिरः कपालं शुचिः प्राण्यङ्गत्वात् । इत्यादिस्थलेषु सर्व प्रमाणतः विपरीतनिश्चयेन सन्देहविशिष्टं कालमतिपतति । सोऽयं कालात्ययेनापदिश्यमानः कालातीतो भवति ।

गौतमेन प्रपञ्चिताः ते हेत्वाभासाः पञ्चधा भवन्ति । उक्तानां चतुःपञ्चानां रूपाणामन्यतमेन विकलाः तदितराङ्गसद्भावेऽपि हेतवः आभासाः भवन्ति । यतो हि रूपशब्दस्यनेकार्थत्वात् । ते पञ्चविधाः । तत्पाञ्चविध्ये प्रमाणं किम् ? तत्र उच्येत गौतमसूत्रमेव प्रमाणम् । सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीताः हेत्वाभासा इति । तत्र हेत्वाभासेषु सव्यभिचारो अनैकान्तिकः । अनैकान्तिकः सव्यभिचारः । स च साधारणोऽसाधारण इति द्विविधो भवतीति केचित् वदन्ति । पक्षत्रयवृत्तिः साधारणः । यथा शब्दः अनित्यः प्रमेयत्वात् । सति सपक्षे पक्षमात्रवृत्तिरसाधारणः । यथा भूःअनित्या गन्धवत्त्वात् । पक्षविपक्षयोरेव वर्तमानो हेतुर्विरुद्धः । अत्र एवकारेण साधारणानैकान्तिकव्यवच्छेदः । साध्यविपर्ययव्याप्तो हेतुर्विरुद्ध इत्याचार्याः । यथा शब्दः नित्यः कर्यत्वात् । तदुक्तम् सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः । अर्थात् यं कञ्चन शब्दनित्यत्वादिसिद्धान्तं प्रतिज्ञाय तत्साधनाय तद्विरोधी तद्विपर्ययव्याप्तो हेतुः प्रयुक्तो विरुद्धः भवति । प्रकरणेन प्रतिरोधकहेतुना समबलत्वात् प्रकरणसम इति । प्रतिरोधो नाम हेतोरर्थनिश्चयप्रवृत्तिप्रतिबन्धः। ननु प्रतिरोधो नाम गतिप्रतिबन्धः । तत्र उच्यते स च हेतोर्वचनात्मकस्यासम्भवि । अतः हेतोरर्थनिश्चयप्रवृत्तिप्रतिबन्धः प्रतिरोधो भवति । सत्प्रतिपक्षो हेतुः प्रकरणसमः इत्याचार्याः । अविद्यमानप्रतीतिहेतुक इत्यर्थः ।

अत्र प्रश्न उदेति यत् दुर्बलेन समबलेन प्रबलेन वा प्रतिरोधः । तत्र उच्यते त्रेधाऽपि न सम्भवति । दुर्बलस्य बाधितत्त्वेन प्रतिरोधकत्वाभावात् । वस्तुनो द्वैरूप्यासम्भवेनोभयोः तुल्यबलत्वायोगात् । प्रबलेन हीनबलस्य बाधितत्वात् कालतीतसङ्करप्रसङ्गात् । अतः त्रेधाऽपि प्रतिरोधः नैव भवितुमर्हति । तत्र उच्यते अगृह्यमाणविशेषत्वेनाभिमानसिद्धसाम्येन प्रतिप्रमाणेन प्रतिरोधो भवति । नानुमानेनैव प्रतिरोधः। अनुमानस्याभिमानसाम्यत्वात् । तथा च प्रत्यक्षेणापि प्रतिरोधसम्भवात् ।यथा शुक्लोऽयं शङ्खः शङ्खत्वादितरशङ्खवत् । इत्यत्र पीतत्वेन प्रत्यक्षोपलब्धेः शुक्ल एव कथम् ? केचित् तमिमं प्रकरणसमं विरुद्धाव्यभिचारीति उपदिशन्ति ।

सिद्धान्तपक्षे यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसम इति । तथा च यस्माद्वादिप्रयुक्ताद्धेतोरूपरि प्रकरणचिन्ता विपरीतसाध्यसाधकहेतुविचारः प्रवर्तते सः निर्णयार्थस्वसाध्यसिद्धर्थमुपदिष्टो वादिहेतुः प्रकरणेन प्रतिहेतुनासमबलत्वात् प्रकरणसम उच्यते। भूषणकारमते स्वपक्षपरपक्षसिद्धावपि त्रिरूपो हेतुः प्रकरणसमः भवति । यथा शब्दः नित्यः पक्षसपक्षयोरन्यतरत्वात् सपक्षवत् । तन्मतं न समीचीनम् । कुत इति चेत् न ह्येकस्यैव हेतोरुभयत्रापि त्रैरूप्यं सम्भवति । अतः असम्भवः स्यात्। अत्र नित्यत्वे साध्ये सपक्षः गगनं भवति इतरत्र तदेव विपक्षः । न त्वेक एव हेतुः सपक्षे गगने वर्तते विपक्षाश्च ततो व्यावर्तते । पक्षसपक्षयोरन्यतरत्वादित्यस्य एकदा शब्दाकाशयोरन्यतरत्वादित्यर्थः अन्यदा शब्दघटयोरन्यतरत्वादित्यर्थः। अतः एकस्य हेतोरुभयत्र त्रैरुप्यं लक्षणं तदैकत्वमेव हेतोरसिद्धं भवति । असिद्धो हेतुः साधसम इति लक्षणम् । साध्याविशिष्टः साध्यत्वात् साध्यसमः इति । साध्यतुल्यो असिद्धः । असिद्धिज्ञानं प्रति सिद्धिज्ञानं कारणं भवति । व्याप्यस्य पक्षवृत्तित्वप्रतीतिः सिद्धिरुच्यते । असिद्धयः चतस्रो भवन्ति । व्याप्यत्वासिद्धिः आश्रयासिद्धिः, स्वरूपासिद्धिः अज्ञानासिद्धश्च । सिद्धिश्च व्याप्यस्य हेतोः पक्षधर्मत्वेन प्रतीतिरिति। व्याप्ति-पक्षधर्मताहेतूनामभावे व्याप्यत्वासिद्ध्याश्रयासिद्धिस्वरूपासिद्धयो भवन्ति । व्याप्यादीनां

त्रयाणामन्यतमस्य प्रतीत्यभावे तु अज्ञानासिद्धिरिति । व्याप्यत्वासिद्धो यथा गर्भस्थो मैत्रीतनयः श्यामः मैत्रीतनयत्वात् सम्प्रतिपन्नवदिति। अत्र शाकाद्याहारपरिणतिप्रयुक्तव्याप्तिकत्वात् सोपाधिकसम्बन्धः । अतः सोपाधिकत्वात् व्याप्यत्वासिद्धः । आश्रयासिद्धो यथा ईश्वरो न सर्वज्ञः कर्तृत्वात् । अत्र ईश्वरासिद्धौ धर्म्यसिद्धेस्तसिद्धौ धर्मिग्राहकबाधात् सन्दिग्धधर्मासिद्धश्चोभयथाप्याश्रयासिद्धिर्भवति । स्वरूपासिद्धो यथा शब्द अनित्यः चाक्षुषत्वात्। स्वस्वरुपासिद्धेरेव भेदात् भागासिद्धिः । यथा वाङ्मनसे अनित्ये मूर्तत्वात् । अत्र पक्षैकदेशे वाचि मूर्तत्वाभावाद् भागासिद्धिः। स्वरूपासिद्धेः भेदान्तराण्यपि भवन्ति । विशेषणासिद्धिविशेष्यासिद्धिव्यर्थविशेषणासिद्धिव्यर्थविशेष्यासिद्धिश्च । विशेषणासिद्धिः यथा शब्दः अनित्यः मूर्तत्वे सति गुणत्वात् । विशेष्यासिद्धिः यथा शब्दः अनित्यगुणत्वे सति मूर्तत्वात् । व्यर्थविशेषणासिद्धिः यथा शब्द अनित्यः गुणत्वे सति कृतकत्वात् । व्यर्थविशेष्यासिद्धिः यथा शब्दः अनित्यः कृतकत्वे सति गुणत्वात् । अयं सार्वभौमः भविष्यति तादृग्भाग्यत्वे सति क्षत्रियत्वादिति सन्दिग्धविशेषणासिद्धिः । अज्ञानसिद्धो यथा देवदत्तो बहुधनो भविष्यति तद्धेतुभूतादृष्टाश्रयत्वात् । सर्वं क्षणिकं सत्त्वात् । भविष्यन्मैत्रीपुत्रो वाग्मी भविष्यति विशिष्टपुरुषत्वात् । एतश्चासिद्धयोऽन्यतरासिद्ध्युभयाऽसिद्धिभेदेन च भिद्यन्ते । अनित्यः शब्दः बाह्येन्द्रियप्रत्यक्षद्रव्यत्वादिति वाद्यसिद्धिः नैयायिकैः द्रव्यत्वा नभ्युपगात् कृतकत्वादिति प्रतिवाद्यसिद्धिः मीमांसकैः तदनङ्गीकारादित्युभविधेयभन्यतरासिद्धिः तत्रैव चाक्षुषत्वादित्युभयासिद्धिः । प्रमाणबाधितविषयः कालातीतः भवति । बलिन एव बाधकत्वाद्बलवतेत्युक्तम्। प्रत्यक्षबाधितो यथा वह्नि अनुष्णः द्रव्यत्वात् । अनुमानबाधितो यथा परमाणवः सावयवाः मूर्तत्वात् । कथमिति चेत् उच्यते त्रसरेणुः सावयवावयवारब्धः चाक्षुषद्रव्यत्वात् घटवत् । तदवयवानामपि कार्यद्रव्यारम्भकत्वात् सावयवत्वानुमाने बाधकं भवति । यथा अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महापरिमाणतारतम्यवत् । अत्रोभयसाध्यानङ्गीकारे अनन्तावयवारब्धत्वाविशेषान्मशक-मातङ्गयोस्तुल्यपरिमाणत्वप्रसङ्गात् अन्यथा अंशत्रयविशिष्टभावनावरोधात् । स्वर्गसाधनत्वेनैवागमावगतानां तदसाधनत्वसाधने तेनैव धर्मिग्राहिणा बाधः । उपमानबाधितो यथा गोसदृशो गवयशब्दवाच्यो न भवति वस्तुत्वात् । शब्दबाधितो यथा यागादयः स्वर्गसाधनं न भवन्ति क्रियात्वात् । तच्चानुमानं सद्धेतुकमेवानुमितिमुद्भावयति न त्वसद्धेतुकम् । असद्धेतवश्च पञ्च भवन्ति । पञ्चविधदोषविशिष्टत्वात् । दोषाश्च पञ्च सव्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधसंज्ञकाः । तत्र सव्यभिचारस्त्रिविधः साधारणासाधारणानुपसंहारिभेदात् ।[16] साध्याभाववद् वृत्तिः साधारणः ।[17] यथा पर्वतो धूमवान् वह्नेः । अयं धूमाभाववदवृत्तिवह्निरित्याकारकव्याप्तेः प्रतिबन्धः क्रियते। साध्यसमानाधिकरणो हेतुरसाधारणः । यथा गगनं स्पर्शवत् शब्दात् । अत्र स्पर्शासमानाधिकरणः शब्दः इत्यने नस्पर्शसमानाधिकरणः शब्दरिति व्याप्तिप्रतिबधः क्रियते । अथवा सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः ।[18] यथा शब्दः नित्यशब्दत्वादित्यत्र शब्दत्वं सर्वनित्येभ्यः सर्वानित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्तिः भवति । तथा चान्वयव्यतिरेकव्याप्तिशून्यत्वे सति पक्षमात्रवृत्तित्वमसाधारणस्य लक्षणम् । तेन चान्वयव्याप्तिर्व्यतिरेकव्याप्तेश्च प्रतिबन्धः क्रियते । अत्यन्ताभावाप्रतियोगिसाध्यादि अनुपसंहारी भवति । यथा घटो अमिधेयः गन्धात् । अत्राभिधेयत्वाभावाप्रसिद्ध्या अभिधेयत्वाभावव्यापकीभूताभावप्रतियोगी गन्ध इति व्यतिरेकव्याप्तेः प्रतिबन्धो भवति ।[19] साध्यव्यापकीभूताभावप्रतियोगी हेतुर्विरुद्धः । यथा पृथिवी

गन्धवती जलात् । अत्र पक्षविशेष्यकसाध्याभावव्याप्यहेतुप्रकारकज्ञानात् पक्षविशेष्यकसाध्यप्रकारकानुमितेः प्रतिबन्धो भवति । यथा पृथिवी गन्धवतीत्यनुमितिं प्रति पृथिवी गन्धाभाववतीत्याकारकज्ञानस्य प्रतिबन्धकत्वात् । तादृशाभावज्ञानस्य सामग्रीरूपविरोधदोषः प्रतिबन्धको भवति । साध्याभावव्याप्यवान् पक्षः सत्प्रतिपक्षः । यथा पर्वतो वह्निमान् धूमात् पर्वतः वह्न्यभाववान् पाषाणमयत्वात् । अत्र सत्प्रतिपक्षस्य सत्त्वे साध्यवानित्यकारानुमितेः प्रतिबन्धः भवति । यतो हि परस्परसाध्याभावव्याप्यवत्ताज्ञानात् परस्परसाध्यव्याप्यवत्ताज्ञानप्रतिबन्धेनानुमितिर्नोत्पद्यते। आश्रयासिद्ध्याद्यन्यतमत्वमसिद्धे लक्षणं भवति ।[20] यथा काञ्चनमयपर्वतः काञ्चनमयवह्निमान् काञ्चनमयधूमात्। असिद्धिस्त्वनेकधा । यथा आश्रयासिद्धिः, साध्याप्रसिद्धिः, हेत्वप्रसिद्धि, स्वरूपासिद्धिः, व्याप्यत्वासिद्धिः इत्यादिः । आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः । यथा कांचनमयपर्वतो वह्निमान् धूमात् । अत्र कांचनमयत्वाभाववान् पर्वत इति आश्रयासिद्धिः । तेन वह्निव्याप्यधूमवान् कांचनमयपर्वतः इति परामर्शः प्रतिबन्धः भवति । साध्ये साध्यातावच्छेदकाभावः साध्याप्रसिद्धिः । यथा पर्वतः कांचनमयवह्निमान् धूमात् इत्यत्र कांचनमयत्वाभाववान् वह्निरिति ज्ञानात् कांचनमयवह्निव्याप्यधूमवान्पवति इति परामर्श नोत्पद्यते । हेतौ हेतुतावच्छेदकाभावः हेत्वप्रसिद्धिः । यथा पर्वतो वह्निमान् काञ्चनमयधूमादित्यत्र काञ्चनमयत्वाभाववान् धूम इति ज्ञानात् प्रतिबन्धो वह्निव्याप्यकाञ्चनमयधूमवान्पर्वत इति परामर्शस्य जायते । पक्षे हेतोरभावः स्वरूपासिद्धिः । यथा शब्दो गुणश्चाक्षुषत्वादित्यत्र चाक्षुषत्वाभाववान् शब्द इति ज्ञानात् गुणत्वव्याप्यचाक्षुषत्ववान् शब्द इति परामर्शस्य प्रतिबन्धो भवति ।[21] सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यव्यापकत्वञ्च साध्याधिकरणवृत्त्यत्यन्ताभावाप्रतियोगित्वम् । साधनाव्यापकत्वञ्च साधनवद्वृत्त्यत्यन्ताभावप्रतियोगित्वम् । यथा पर्वतो धूमवान् वह्नेरित्यत्रान्द्रेन्धनसंयोगोपाधिः। अत्रार्द्रेन्धनसंयोगः धूमस्य व्यापकः वह्नेरव्यापको भवति । आयोगोलके आर्द्रेन्धनसंयोगाभावात्। अतः वह्निर्हेतुः व्याप्यत्वासिद्धो भवति ।[22] पक्षे साध्याभावो बाधो भवति । यथा वह्निरनुष्णः तेजस्त्वात् । अत्र प्रत्यक्षेण वह्नावुष्णत्वनिश्चये वह्निरनुष्णः इत्यनुमितेः प्रतिबन्धो भवति ।[23] एवं प्रकारेण हेतुवदाभासमानत्वेन हेत्वाभास इति । तादृशहेत्वाभासानां ज्ञानं परम्परया मोक्षसाधकं भवतीति।

पादटीका -

1. तत्त्वचिन्तामणिः, हेत्वा.प्र.
2. द्वितीयाकारके व्युत्पत्तिवादे
3. गादाधरी हे.प्र.
4. गादाधरी सा.नि. तत्त्वनिर्णयपदार्थविचारः
5. गा.सा.नि. विजयप्रयोजकताविचारः
6. तत्त्वचिन्तामणि हे.प्र.ल.

7. क्रोडपत्रम् - हे.ल.वि.
8. दीधितिः हे.नि.
9. न्या.भा.हे.नि.
10.न्या.सू. १.२.४।
11.न्या.सू. १.२.५।
12.न्या.सू. १.२.६।
13.न्या.सू. १.२.७।
14.न्या.सू. १.२.८।
15.न्या.सू. १.२.९।
16.तर्कसंग्रहः.सा.ल.।
17.न्या.बो.।
18.तर्क.अ.सा.ल.।
19.न्याय.बो.।
20.त.पदकृत्यं अ.ल.वि. ।
21.त.न्या.बो.स्व.ल.।
22.त.उ.स्व. प्र.।
23.बा.ल.क्रोडपत्रम्।

सहायकाचार्यः, न्यायविभागः
राष्ट्रियसंस्कृतसंस्थानम्
श्रीसदाशिवपरिसरः
पुरी, ओडिशा